तृतीयभागः

दशमः पाठः

# १०. समयस्फूर्तिः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के किं कुर्वन्ति।

२. चित्रे काकः सर्पं किमर्थं मारयितुम् उद्युक्तः?

३. सः कीदृशीं समयस्फूर्तिं प्रदर्शितवान्?

## पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

श्रीकृष्णदेवरायस्य सभायाः ''भुवनविजयम्'' इति नाम। तस्याम् 'अष्टदिग्गजाः' इति प्रसिद्धाः अष्टौ कवयः आसन्। सर्वदिग्भ्यः महापण्डिताः तस्यां सभायाम् आगत्य, स्वीयं नैपुण्यं प्रदर्शयन्ति स्म।

एकदा एकः महान् पण्डितः कृष्णदेवरायस्य सभाम् आगतवान्। सः सभामध्ये एकां घोषणां कृतवान्। ''मम नाम नन्दकभट्टः। अहं काश्मीरदेशीयः। सकलशास्त्राणि पठितवान्। अनेकेषु राज्येषु गत्वा अहं तत्रस्थान् पण्डितान् वादे पराजित्य बहून् पुरस्कारान् प्राप्तवान्। इदानीं भवतः सभायां कविपण्डितैः सह वादं कर्तुम् इच्छामि। भवतः राज्ये मया सह वादं कर्तुं कोऽपि कविपण्डितः सन्नद्धः अस्ति चेत् सः पुरतः आगच्छतु। नो चेत् 'वयं पराजिताः' इति अङ्गीकृत्य मां सम्मानयन्तु।'' इति अवदत्।

राजा श्रीकृष्णदेवरायः सभायां सर्वान् कविपण्डितान् एवम् उक्तवान्। 'हे कविवराः ! नन्दकभट्टं पराजित्य देशप्रतिष्ठां रक्षन्तु' इति। नन्दकभट्टस्य प्रतिभां ज्ञात्वा सप्तकवयः मौनेन स्थितवन्तः। तेषु तेनालिरामकृष्णकविः नन्दकभट्टेन सह वादं कर्तुं सिद्धः अभवत्। परन्तु सः 'अद्य मम स्वास्थ्यं न समीचीनम्। श्वः वादस्पर्धां कर्तुम् इच्छामि' इति अवोचत्।

सायङ्काले रामकृष्णः अन्यवेषं धृत्वा नन्दकभट्टस्य वासं गतवान्। 'महोदय ! रामसुब्बय्य इति मम नाम। अहम् आस्थानरक्षकः। विरामसमये साहित्यं पठामि' इत्युक्त्वा एकं तालपत्रग्रन्थाकारं किमपि वस्तु दर्शयित्वा 'एषः ग्रन्थः तेनालिरामकृष्णमहोदयस्य। इदानीम् एतं तस्मै प्रत्यर्पयितुं गच्छामि। मार्गमध्ये भवतः दर्शनं कर्तुम् आगतवान्' इति अवदत्। तदा नन्दकभट्टः 'आर्य ! तस्य ग्रन्थस्य नाम किम्?' इति पृष्टवान्। 'अस्य नाम तिलकाष्ठमहिषबन्धनम्। श्वः एतस्य विषये एव चर्चा भविष्यति' इति उक्त्वा ततः गतवान्।

ततः नन्दकभट्टः अचिन्तयत् - 'एतं ग्रन्थम् अहं न कदापि पठितवान्। न श्रुतवान् च। एतस्य ग्रन्थस्य विषये



SCERT TELANGANA



चर्चां कर्तुम् अहं तु न समर्थः। अतः तं जेतुम् असमर्थः' इति मत्वा सः पराजयभयेन कमपि अनुक्त्वैव विजयनगरतः पलायनं कृतवान्।

परस्मिन् दिने सभायां नन्दकभट्टः न आगतवान्। सः नगरतः पलायनं कृतवान् इति वार्ता ज्ञाता। महाराजः आश्चर्येण रामकृष्णं पृष्टवान्। रामकृष्णः सर्वं वृत्तान्तं महाराजाय निवेद्य 'सः एनं ग्रन्थं न कदापि दृष्टवान्। अतः पराजयभयेन पलायितवान् ' इत्युक्त्वा 'एषः एव स ग्रन्थः' इति उक्तवान्। तदा महाराजः 'न केवलं सः, वयमपि तं ग्रन्थं न जानीमः। एकवारं दर्शयतु' इति अवदत्। तदा रामकृष्णकविः 'किमपि नास्ति महाराज ! तिलकाष्ठानि महिषबन्धनरज्ज्वा बध्वा नीतवान्। तदेव 'तिलकाष्ठमहिषबन्धनम्' इति उक्तवान्।' तत् श्रुत्वा महाराजेन सह सर्वे अहसन्। श्रीकृष्णदेवरायः रामकृष्णस्य समयस्फूर्तिं प्रशंसितवान्। तं कविं बहुधा सम्मानितवान् च।





# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. कथां स्वीयवाक्यैः वदन्तु।

आ. अस्यां कथायां रामकृष्णकविः कथं व्यवहृतवान्?

इ. भवान्/भवती कदापि एतादृशपरिस्थितौ कथं व्यवहरति? - ऊहित्वा वदतु।

ई. नन्दकभट्टः किं चिन्तयित्वा पलायनं कृतवान्?

उ. अधः दत्तवाक्यानि कैः कं प्रति उक्तानि इति वदन्तु।

१. नन्दकभट्टं पराजित्य देशप्रतिष्ठां रक्षन्तु।
२. तस्य ग्रन्थस्य नाम किम्?
३. श्वः वादस्पर्धां कर्तुम् इच्छामि।
४. श्वः एतस्य विषये एव चर्चा भविष्यति।
५. वयं पराजिताः इति अङ्गीकृत्य मां सम्मानयन्तु।
६. रामसुब्बय्या इति मम नाम।

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् अवगच्छन्तु।

| | | | |
|---|---|---|---|
| सर्वतः | स्वीयं | नैपुण्यम् | महान् |
| श्वः | वादस्पर्धा | पुरतः | मत्वा |
| बहुधा | एकवारं | समीचीनम् | पराजित्य |

आ. घटनानुसारं वाक्यानि क्रमेण लिखन्तु।

१. श्रीकृष्णदेवरायः रामकृष्णकविं बहुधा सम्मानितवान्।
२. श्रीकृष्णदेवरायस्य सभायाम् अष्टदिग्गजाः इति अष्टौ कवयः आसन्।
३. रामकृष्णकविः नन्दकभट्टेन सह वादस्पर्धां कर्तुम् उद्युक्तः आसीत्।
४. ग्रन्थस्य नाम तिलकाष्ठमहिषबन्धनम् इति श्रुत्वा पण्डितः नगरात् पलायनं कृतवान्।
५. तेन सह वादं कर्तुं कोऽपि पण्डितः सन्नद्धः अस्ति वा इति पृष्टवान्।
६. एकदा नन्दकभट्टः नाम एकः महान् पण्डितः सभाम् आगतवान्।

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. नन्दकभट्टः सभायां किमिति घोषणां कृतवान्?

२. रामकृष्णकविः चर्चां श्वः कर्तुम् इच्छामि इति किमर्थम् उक्तवान्?

३. तिलकाष्ठमहिषबन्धनम् नाम किम्?

४. श्रीकृष्णदेवरायः रामकृष्णकविं किमर्थं सम्मानितवान्?



### आ. चिन्तयन्तु, लिखन्तु

१. नन्दकभट्टः कीदृशः?

२. पाठे कः भवतः इष्टः? किमर्थम्?

३. यदि नन्दकभट्टेन समग्रं चिन्तनं क्रियते चेत् किम् अभविष्यत्?

४. कर्गदस्य आगमनात् पूर्वं जनाः केषाम् उपरि लेखनकार्यं कुर्वन्ति स्म?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः दत्ते पदे बहूनि अन्यपदानि सन्ति। तानि अन्विष्य लिखन्तु।

**भु व न वि ज य म्**

उदाः - विजयम्

### आ. अधः दत्तेषु वाक्येषु रेखाङ्कितपदस्य विरुद्धपदं पट्टिकायाम् अस्ति। तत् चित्वा तदेव वाक्यं विरुद्धार्थेन पदेन लिखन्तु।

| |
|---|
| पृष्ठतः |
| मूर्खः |
| तिरस्कारः |
| विकृतम् |
| भक्षकः |

उदा - भुवनविजयसभायां पण्डितः आसीत्। भुवनविजयसभायां मूर्खः न आसीत्।

१. तेनालिरामकृष्णेन पुरस्कारः लब्धः। ....................................

२. अहम् अत्र धनागाररक्षकः। ....................................

३. बस्यानम् मम पुरतः अस्ति। ....................................

४. पूर्णिमायां चन्द्रबिम्बम् सुन्दरं भवति। ....................................

SCERT TELANGANA

## ५. व्याकरणांशाः



**अ. अधः दत्तेषु वाक्येषु एकवचनम् अन्विष्य तस्य बहुवचनरूपं लिखन्तु।**

उदा - बालकः पुस्तकं पठति। बालकाः पुस्तकानि पठन्ति। (अथवा)
बालकः पुस्तकानि पठति।

१. भिक्षुकः भोजनं करोति। ........................................
२. सुषमा चित्रं पश्यति। ........................................
३. सभायां पण्डितः अस्ति। ........................................
४. पाठशालायां बालिका खेलति। ........................................
५. कविः कवितां वदति। ........................................

**आ. अत्र कानिचित् पुंलिङ्गक्तवतुप्रत्ययान्तानि पदानि सन्ति। तेषां स्त्रीलिङ्गरूपं लिखन्तु। तयोः पार्श्वे भूतकाले लङ्रूपाणि सन्ति। उदाहरणं द्दष्ट्वा तथापि लिखन्तु।**

| | पुंलिङ्गे | स्त्रीलिङ्गे | भूते लङ् |
|---|---|---|---|
| उदाः- | पठितवान् | पठितवती | अपठत् |
| | लिखितवान् | .............. | ............... |
| | गतवान् | .............. | ............... |
| | पृष्टवान् | .............. | ............... |
| | कृतवान् | .............. | ............... |
| | खादितवान् | .............. | ............... |

## ६. सर्जनात्मकव्यक्तीकरणम्



**इमां कथां नाटकरूपेण मातृभाषया लिखन्तु। अभिनीय प्रदर्शयन्तु।**

## ७. परियोजनाकार्यम्



**श्रीकृष्णदेवरायस्य आस्थाने अष्टदिग्गजाः इति कवयः आसन्। तेषां नामानि - तैः रचितकाव्यानां नामानि सङ्कलय्य भित्तिपत्रिकायां स्थापयन्तु।**

SCERT TELANGANA

## ८. प्रशंसा



गिरीशः - हे गोपाल ! प्रातः अध्यापकः एकाम् उत्तमकथां श्रावितवान्। भवान् प्रातः किमर्थं नागतः?

गोपालः - प्रातः मम अम्बा ज्वरपीडिता आसीत्। वैद्यात् औषधम् आनीय अम्बायै दत्त्वा आगच्छामि। अतः विलम्बः अभवत्। अध्यापकः किमपि दण्डनं करोति इति भयं भवति।

गिरीशः - भवान् उत्तमं कार्यं कृतवान्। मातृसेवापेक्षया श्रेष्ठं किमपि नास्ति।

(भवान्/भवती मातृसेवां कथं करोति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. कथां स्वीयवाक्यैः वक्तुं शक्नोमि। | | | |
| ३. समयस्फूर्तिः नाम किमिति लेखितुं शक्नोमि । | | | |
| ४. कथां नाटकरूपेण प्रदर्शयितुं शक्नोमि । | | | |

**किं किं न साधयति कल्पलतेव विद्या**

SCERT TELANGANA

तृतीयभागः

पठन्तु - नन्दन्तु

# वेङ्गलप्पस्य अमायिकता



वेङ्गलप्पः अमायिकः। तस्य मातापितरौ तस्मिन् बहु अनुरागं दर्शयतः। अतः तौ दशवर्षीयम् अपि तं विद्यालयं न प्रेषितवन्तौ।

वेङ्गलप्पस्य जनकः किष्टप्पः स्वपुत्रं सर्वेषु कार्येषु योजयति। सः तदा तदा रुच्यान् खाद्यपदार्थान् क्रीत्वा पुत्राय ददाति। एकस्मिन् दिने किष्टप्पः भूचणकान् क्रीत्वा दत्तवान्। भूचणकान् खादितुं पुटकम् उद्घाटयन् वेङ्गलप्पः प्रमादेन सर्वान् अधः पातितवान्। 'रे ! क्रीतं वस्तु स्यूते जागरूकतया स्थापनीयम्। तदानीमेव तत् नष्टं न भवति ' इति पुत्रम् आत्मीयतया उपदिष्टवान् किष्टप्पः।

एकस्मिन् दिने वेङ्गलप्पस्य माता तं - 'रे ! प्रतिवेशिनः गृहं गत्वा पादलीटर्-परिमितं क्षीरम् आनयतु ' इति उक्तवती। वेङ्गलप्पः शीघ्रमेव गत्वा क्षीरम् आनीतवान्। क्षीरं कुत्र? इति पृष्टवती तस्य अम्बा।

"स्यूते पूरयित्वा क्षीरम् आनीतवान् अम्ब! यदा भूचणकाः भूमौ पतिताः तदा पिता स्यूते स्थापितं वस्तु नष्टं न भवति इति उक्तवान्। तत् सम्यक् स्मरणे स्थापितवान्" इति स्वमुखे अमायिकतां दर्शयन् उक्तवान् वेङ्गलप्पः।

किं प्रतिवचनं दातव्यम् इति अम्बा दिग्भ्रान्ता अभवत् । अनन्तरदिने एव वेङ्गलप्पं तस्य पितरौ विद्यालये प्रवेशितवन्तौ।

SCERT TELANGANA